## संस्कृत वार्ताः

**दिनाङ्क : 12/04/2026**

**सायम् - 06:20**

**इयम् आकाशवाणी**
**सम्प्रतिः वार्ताः श्रूयन्ताम्**

-

-

## आदौ मुख्यवार्ताः

- प्रख्यात-गायिका आशा-भोसले मुंबईय्यां द्विनवतितमे वयसि दिवङ्गता।
- प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् महिलारक्षणाधिनियमस्य कार्यान्वयनस्य समयः समागतः। सः सर्वान् सदस्यान् ऐक्येन अस्याधिनियमस्य संशोधनानि पारयितुं समाहूतवान्।
- पश्चिमबङ्गाल-तमिलनाडुराज्ययोः विधानसभा-निर्वाचनाय प्रचाराभियानं सजवं प्रवर्तते । प्रधानमन्त्री नरेन्द्रमोदी अद्य पश्चिमबङ्गालस्य सिलीगुड़ी-नगरे एकाम् जनसभाम् सम्बोधितवान्।
- अमरनाथस्य वार्षिक-तीर्थयात्रा जुलाई-मासस्य तृतीय-दिनाङ्कात् समारप्स्यते। तीर्थयात्रा-निमित्तं पञ्जीकरण-प्रक्रिया पञ्चदश- दिनाङ्कतः प्रारप्स्यते।
- पश्चिम-एशिया-शान्ति-सन्धौ सहमत्या विनैव अमेरिका-ईरान- प्रतिनिधिमण्डले अद्य इस्लामाबाद-नगरतः प्रस्थितवन्तौ।
- आईपीएल क्रिकेट स्पर्धा मालिकायाः अद्य द्वितीयायां स्पर्धायां वानखेड़े क्रीडांगणे मुंबई इंडियन्स दलं रॉयल चैलेजर्स बैंगलुरु दलं सम्मुखी-करिष्यति।

## अथ वार्ताः विस्तरेण

**आशा-भोसले**

प्रख्यात- गायिका, पद्मविभूषण-पुरस्कारेण च सम्मानिता आशा भोसले इत्येषा अद्य मुम्बई-नगरे द्विनवतितमे वयसि दिवङ्गता। महाराष्ट्रस्य संस्कृति-मन्त्री आशीष-शेलारः चिकित्सालयस्य बहिः वार्ताहरैस्सह सह वार्तां कुर्वन् एतत् विज्ञापितवान्। गतसायं तस्याः हृदि वेदनायां सत्यां सा चिकित्सायै नीता। श्वः सायङ्काले चतुर्वादने मुम्बई-नगरस्य शिवाजी-पार्क इत्याख्ये स्थले तस्याः अन्त्येष्टिः भविष्यति।

प्रधानमन्त्री नरेन्द्रमोदी प्रख्यात-गायिकायाः आशाभोसले इत्यस्याः निधने गभीरं दुःखं प्रकटितवान्। सामाजिक-सञ्जालीय-माध्यमे स्वसन्देशे श्रीमोदी अवदत् यत् आशा भोसले भारतस्य सुप्रसिद्धासु बहुमुखी-प्रतिभा-युक्तासु वाणीषु अन्यतमा आसीत्। राष्ट्रपतिपदासीना द्रौपदी मुर्मूः अवसरेऽस्मिन् शोकं प्रकटितवती। राष्ट्रपतिना प्रोक्तं यत् तस्याः निधनेन सङ्गीतजगति अपूरणीया क्षतिः समभवत्।

**प्रधानमन्त्री-महिलारक्षणम्**

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् इदानीं महिला-आरक्षण-विधेयकस्य वास्तविक-रूपेण कार्यान्वयन-समयः आगतो विद्यते। सः आशां प्रकटितवान् यत् एकोनत्रिंशदधिक-द्विसहस्रतमवर्षस्य लोकसभा-निर्वाचनं राज्य-विधानसभा-निर्वाचनानि च महिलाभ्यः निर्धारितारक्षणं समेत्य भविष्यन्ति। संसद्-भवनस्य त्रिदिवसीय-विशेषाधिवेशनात् प्राक् लोकसभायाः राज्यसभायाः च सदन-नेतृभ्यः प्रेषिते पत्रे श्रीमोदी सर्वान् सदस्यान् एकस्वरेण अस्य विधेयकस्य संशोधनानि पारयितुं साहाय्यं याचितवान्। अस्य अधिनियमस्य प्रवर्तनेन लोकसभासनानां संख्या षोडशाधिक-अष्टशतं भविष्यति, यत्र त्रिसप्तत्यधिक-द्विशतं आसनानि महिलाभ्यः आरक्षितानि भविष्यन्ति। अनेनैव सह भारतीय-जनता-पार्टीति दलेन स्व-सांसदेभ्यः व्हिप इति आधिकारिक-आदेशः निस्सारितः, येन आगामि-षोडश-दिनाङ्कतः अष्टादश-दिनाङ्कं यावत् सर्वेषां उपस्थितिः अनिवार्या भविष्यति। अस्मिन् अवसरे कस्यापि सदस्यस्य कृते अवकाशः न प्रदास्यते। संसद्-भवनस्य एतत् विशेषाधिवेशनं गुरुवासरात् प्रारभ्यते, यस्य मुख्य-केन्द्रं महिला-आरक्षण-संशोधन-विधेयकं वर्तते।

**पश्चिमबङ्गाल-निर्वाचनप्रचारः**

पश्चिमबङ्गाल तमिलनाडुराज्ययोः निर्वाचनप्रचारः तीव्रतया प्रवर्तते, यतः अस्य मासस्य त्रयोविंशति-दिनाङ्के भविष्यति मतदानम्, यस्य कृते केवलं एकादश-दिनानि अवशिष्टानि सन्ति। पश्चिमबङ्गाले सर्वाणि प्रमुखानि राजनैतिकदलानि स्वस्य शीर्षनेतृभिस्सह सर्वेषु जनपदेषु जनसभां सम्बोधयन्ति। भारतीयजनतादलस्य वरिष्ठनेता तथा प्रधानमन्त्री नरेन्द्रमोदी सिलिगुडी-नगरस्य कावाखाली-स्थाने एकां जनसभां सम्बोधितवान्। प्रधानमन्त्रिणा उक्तं यत् पश्चिमबङ्गालस्य जनानां मध्ये उत्साहः अस्य संकेतः अस्ति यत् आगामिषु निर्वाचनेषु सत्तारूढं तृणमूल-काङ्ग्रेस्-दलं पराजयं प्राप्स्यति।

प्रधानमन्त्री नरेन्द्रमोदी आरोपितवान् यत् तृणमूल कांग्रेस- प्रशासनेन स्वकार्यकाले राज्यस्य विकासं अत्यन्तं प्रभावितम् । श्रीमोदी इदमपि अवदत् यत् निधिविनियोगे असन्तुलनम् आसीत्। तेन उक्तं यत् मदरसा इत्यस्य कृते पर्याप्तसंसाधनानि प्रदत्तानि, परञ्च उत्तरबङ्गप्रदेशस्य विकासावश्यकताः सम्यक् न पूरिताः। प्रधानमन्त्री अग्रे आरोपितवान् यत् राज्यप्रशासनम् महिलानां पर्याप्तसुरक्षां सुनिश्चेतुं असमर्थम् आसीत्। तेन जनसामान्याय आह्वानं कृतं यत् राज्ये विकासाय उत्तमशासनाय च भारतीय जनता पार्टीति दलस्य समर्थनं कुर्वन्तु। उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः बांकुरा-जनपदस्य सोनमुखी-क्षेत्रे तथा च पूर्वमेदिनीपुर-जनपदस्य नन्दकुमार-कांथीदक्षिणक्षेत्रयोः सभां संबोधयितुं गमिष्यति। अस्मिन्नेव क्रमे तृणमूल कांग्रेस दलस्य नेतृ ममता बनर्जी पूर्ववर्धमान-जनपदस्य खण्डघोष-क्षेत्रे आयोजितायां निर्वाचनसभायां संबोधितवती तथा भारतीय जनता पार्टीति -दलस्य आलोचनां कृतवती। सा उक्तवती यत् तस्याः दलं स्ववचनानि पूरयति, किन्तु भाजपानेतारः केवलं वचनानि प्रयच्छन्ति, तानि नैव पूरयन्ति।

**अमरनाथ-यात्रा**

ऐषमे वर्षे वार्षिक-अमरनाथ-यात्रा जुलाई-मासस्य तृतीय-दिनाङ्कात् आरभ्य अष्टाविंशति-दिनाङ्कं यावत् रक्षाबन्धनावसरे समाप्तिमेष्यति। जम्मू-कश्मीरस्य उप-राज्यपालः मनोज-सिन्हा अद्य उद्घोषितवान् यत् इयं यात्रा तावत् सप्तपञ्चाशत् दिनानि यावत् प्रचलिष्यति ।

उप-राज्यपालेन सामाजिक-सञ्जालीय-माध्यमे संसूचितं यत् भगवतः शिवस्य आशीर्प्राप्तये प्रथमं पूजनं ज्येष्ठ-पूर्णिमायां इत्युक्ते जून-मासस्य एकोनत्रिंशद्दिनाङ्के समायोजयिष्यते। सः अवदत् यत् तीर्थयात्रायै पूर्व-पञ्जीकरणं एप्रिल-मासस्य पञ्चदश-दिनाङ्कतः अन्तर्जालीय-माध्यमेन सहैव प्रत्यक्ष-रूपेण चारभ्यते। देशव्यापी-स्तरे जम्मू-कश्मीर-बैङ्क,पञ्जाब-नेशनल-बैङ्क,भारतीय-स्टेट-बैङ्क एवमेव यस-बैङ्क इत्यादीनां चतुष्पञ्चाशदधिक-पञ्चशतशाखासु पञ्जीकरणस्य व्यवस्था भविष्यति।

**अमेरिका-ईरानदेशौ**

अमेरिकायाः उपराष्ट्रपतेः जे.डी.वैन्स इत्यस्य नेतृत्वयुतं प्रतिनिधिमण्डलं तथा च ईरान-देशस्य प्रतिनिधिमण्डलम् इस्लामाबाद-नगरतः प्रस्थितवन्तौ। उभयोः पक्षयोः मध्ये कस्मिन्नपि सन्धौ सहमतिः न सञ्जाता। अमेरिकायाः उप-राष्ट्रपतिना शान्ति-वार्तायाः विफलतायाः कारणत्वेन ईरान-देशस्य नकारात्मक-दृष्टिकोणः प्रतिपादितः। तेन प्रतिपादितं यत् ईरान-देशः आण्विक-शस्त्राणां निर्माण-सम्बद्धान् प्रस्तावान् निराकृतवान्। अपरतः, ईरान-देशस्य सर्वकारीय-प्रसारमाध्यमैः अपि वार्तायाः वैफल्यं स्पष्टीकृतम्। ईरान-देशस्य विदेश-मन्त्रालयेन प्रोक्तं यत् मुख्येषु द्वि-त्रि-विषयेषु मतभेदकारणात् इयं स्थितिः समुत्पन्ना।

अवधेयास्पदमिदं यत् ईरान-देशस्य अयं सङ्घर्षः फरवरी-मासस्य अन्ते प्रारब्धः आसीत्। उभयोः पक्षयोः मध्ये एकविंशति-होरां यावत् सुदीर्घा चर्चा समजायत। वार्ता-सौकर्याय अष्टमे दिनाङ्के सप्ताहद्वयात्मकः युद्ध-विरामः अपि कृतः , परन्तु इदानीं परिणामं विनैव इयं वार्ता समाप्ता।

**जयशंकर-यूएई**

विदेशमन्त्री एस.जयशंकरः यूएई देशस्य द्विदिवसीयायां यात्रायाम् अस्ति। डॉ. जयशंकरः पश्चिम-एशियादेशे वर्तमानसमये भारतीयनागरिकाणां कल्याणमालक्ष्य अबूधाबी-नगरे उच्चस्तरीयवार्तां कृतवान्। सः ह्यः यूएई-देशस्य उपप्रधानमन्त्रिणा विदेशमन्त्रिणा च शेख अब्दुल्ला बिन जायद अल नाहयानेन सह मिलितवान्। अस्मिन् अवसरे चर्चायाः मुख्यविषयः क्षेत्रीयस्थितौ जायमानानि परिवर्तनानि तस्य प्रभावाश्च आसन्। डॉ. जयशंकरः भारतीयसमुदायस्य सुरक्षा-कल्याणयोः सुनिश्चयार्थं यूएई-प्रशासनस्य सहयोगाय कृतज्ञतां प्रकटितवान्। सममेव उभयोः देशयोः मध्ये व्यापक-रणनीतिक- सम्बन्धान् सुदृढीकर्तुं उपायान् अपि प्रकल्पितवान्।

**आई पी एल क्रिकेट**

आई पी एल क्रिकेट स्पर्धा मालिकायाम् अद्य लखनऊ सुपर जायंटस गुजरात टायटंस दलयोः मध्ये स्पर्धा मध्याह्ने क्रीडिता। अस्यां स्पर्धायां प्रप्रथमं क्रीडयता लखनऊ सुपर जायंटस दलेन गुजरात टायटंस दलाय पञ्च षष्ट्यधिकैक-शत-धावनांकानां लक्ष्यं समुपस्थापितम्। अपरतः एका अन्या स्पर्धा सायं सार्धसप्त वादने भविष्यति यत्र वानखेड़े क्रीडांगणे मुंबई इंडियन्स दलं रॉयल चैलेजर्स बैंगलुरु दलं सम्मुखी-करिष्यति।

**।। इति वार्ताः ।।**